National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 54-55
© 2025 NJHSR
www.sanskritarticle.com

**Pami Sardar**
Ph.D Research Scholar,
National Sanskrit University,
Tirupati

# संस्कृतसाहित्ये औचित्यस्य प्रयोजनीयता आवश्यकता च

**Pami Sardar**

**औचित्यस्य उद्भवः विकाश्च -**

उचितस्य भावः **औचित्यम्।** **(The sence of what is the right is Justification)** "उच **समवायी**[1]" इति धातोः उच्चति इत्यर्थः **"इगुपधज्ञाप्रीकिरः**[2]" इति सूत्रेण "कृत्" प्रत्यये **"उचः"** इति रूपं सिद्धति। समवायः इत्यर्थः **"सम्यक् मेलनम्"** अर्हं वा मेलनमिति तस्यार्थः । वर्णेन वर्णनस्य यत्र योग्यः सम्बन्धो भवति सः उचः । उचः अस्मिन् सञ्जातः इति विग्रहे ' **तदस्य संजातं तारकादिभ्यः इतच्**'[3] इति सूत्रेण इतच् प्रत्यये उचितम् इति रूपं भवति। समवेतमित्यर्थः। एतद् च वर्णनम् अस्मिन् सन्दर्भे योग्यमिति काव्यविषये अवगन्तव्यम् । लोकेऽपि उचित शब्दः योग्यः इत्यर्थे प्रयुज्यते। वयसः उचितम् कुलस्योचितम्, आश्रमस्योचित्तम्, इत्यादि व्यवहारः प्रसिद्धः एव। उचितस्य कर्मभावो वा औचित्यमिति औचित्य शब्दस्य अर्थः अमरकोशव्याख्यायां उक्तः।[4] उचितशब्दस्य **'चिरामस्तः विषयः'** इत्यर्थः मल्लिनाथेन किरातार्जुनीयव्याख्यायाम् प्रतिपादितः।

**परिभ्रमन्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरुषितः।**
**महारथः सत्यधनस्य मानसं दुनोति नो कश्चिदयं वृकोदरः॥**[5]

लोहितचन्दनोचित उचितलोहितचन्दनः। **'वाहिताग्न्यादिषु'** इति सूत्रेण प्रमाणितः। अभ्यस्तम् अभ्यस्तरक्तचन्दन इत्यर्थः।

औचित्यशब्दस्य स्त्रीलिङ्गे औचिती इति रूपम् भवति।उभयत्र **"गुणवचन ब्राह्मणादिभ्यः कर्मणि च"**[6] इति शीङ् प्रत्ययः क्रियते।

औचित्यशब्दस्य क्लीबलिङ्गे एव प्रयोगः। इति पूर्वोक्तः अमरकोशसन्दर्भे उक्तम्। स्त्रीत्वविवक्षायं **"षिदगौरादिभ्यश्च"**[7] इति ङीप् प्रत्यये **'हलस्तद्धितस्य'**[8] इति सकारलोपे औचिती इति रूपम् सिद्धति।

अत एव क्षेमेन्द्रः औचित्यशब्दार्थम् एवं प्रतिपादयति -

**उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।**
**उचितस्य च यो भावस्तदौचित्यं प्रचक्षते॥**[9]

**अलङ्कारशास्त्रे औचित्यप्रस्थानस्य विकासक्रमः –**

रामायण, महाभारतादिव्षपि औचित्यशव्दस्य प्रयोगः वहुत्र दरीदृश्यते। अलंकारशास्त्रे औचित्यशब्दस्य विकासः कथमभूदिति किञ्चिद् अवलोकनीयम्। औचित्यप्रस्थानस्य विभागद्वयं क्रियते। ध्वनिकाल पूर्ववर्तिनः पररवर्तिनश्च च इति।

**Correspondence:**
**Pami Sardar**
Ph.D Research Scholar,
National Sanskrit University,
Tirupati

- ❖ **ध्वनिकालपूर्ववर्तिकाले भरतः,भामहः, वामनः, दण्डीः, यशोवर्मा, भट्टलोल्लटः, रुद्रटः,** इत्येते प्रमुखाः।
- ❖ **ध्वनिपरवर्तिकाले आनन्दवर्धनः, अभिनवगुप्तः, भोजराजः, कुन्तकः, महिमभट्टः, क्षेमेन्द्रः** इत्येते मुख्याः।
- ❖ क्षेमेन्द्रः अनन्तरं जगन्नाथः उभयोऽपि काव्ये औचित्यमधिकृत्य विस्तृता चर्चां चक्रतुः।
- ❖ औचित्यविषये अर्वाचीन आचार्याणां नामाणि – **डा.राघवन् , डा.सूर्यकान्तः, आचार्य वाजपेयी, पण्डित विश्वनाथप्रसाद मिश्रः, आचार्यः हाजारीप्रसाद द्विवेदी, डा. नागेन्द्रः, डा. रामलाल सिंहः, डा.मनोहरलाल गौड, श्री. रामपाल विद्यालंकारः, महामहोपाध्याय कुप्पुस्वामी शास्त्री, महामहोपाध्याय आचार्यः पी. श्रीरामचन्द्रः** इत्येते प्रमुखाः।

प्रायशः सर्वेरालङ्कारिकैः तेषां ग्रन्थेषु गुणप्रकरणं दोषप्रकरणमिति प्रकारणद्वयं वर्तते। काव्ये यत् उचितम् सः गुणः, अनुचितं दोषः इति अङ्गीक्रियते, चेत् औचित्यप्रस्थानं सर्वमान्यं भवति।

महिमभट्टस्य अनन्तरम् आचार्यक्षेमेन्द्रस्य समयः यद्यपि काव्यतत्त्वरूपेण औचित्यस्य महत्वस्वीकारस्य सुदीर्घ इतिहास वर्तते। तथापि औचित्यस्य सर्वाङ्गीणनिवेचनं प्रस्तुन्वन् औचित्यं काव्यस्यात्मरूपेण स्थापयित्वा औचित्यसाम्प्रदायस्य प्रवर्तकः क्षेमेन्द्रः इत्थं प्रस्तौति। औचित्यविचारचर्चा एव औचित्यसाम्प्रदायस्य मूलभूतग्रन्थः अस्ति। इदमेव कारणं येन विद्वान्सः क्षेमेन्द्रम् औचित्यसाम्प्रदायस्य प्रवर्तकः मन्यन्ते। प्रभूतसंस्कृतवाङ्मयप्रणेतुः क्षेमेन्द्रस्य संस्कृतजगतः सर्वदा ऋणी भवति।

क्षेमेन्द्रस्य पश्चात् अलङ्कारग्रन्थेषु रसगङ्गाधरे एव औचित्यविचारः कृतः। प्रथमानने **'रसविरोधपरिहार'** प्रकरणे रसानुकूलगुणसंघटनाग्रथने च जगन्नाथः प्रायशः ध्वनिकारकमतमेव अनुसरति।

**औचित्यस्य प्रकारभेदः -**

**पदे वाक्ये प्रबन्धार्थे गुणेऽलङ्करणे रसे।**
**क्रियायां कारके लिङ्गे वचने च विशेषणे ॥८॥**[10]
**उपसर्गे निपाते च काले देशे कुले व्रते ।**
**तत्वे सत्वेऽभिप्राये स्वभावे सारसङ्ग्रहे ॥९॥**[11]
**प्रतिभायामवस्थायां विचारे नान्यथाशिषि।**
**काव्यस्याङ्गेषु च प्राहुरौचित्यं व्यापि जीवितम् ॥१०॥**[12]

एवं रूपेण सप्तविंशत्यौचित्यभेदाः वर्तन्ते। क्रमानुसारं संक्षिप्ततया वक्ष्यामः।

**संस्कृतसाहित्ये औचित्यस्य प्रयोजनीयता –**

संस्कृतसादित्ये औचित्यस्य प्रयोजनीयता बहुधा दरीदृश्यते। औचित्यं विना किमपि कार्यं न सफलता प्राप्नुवन्ति। यथा पाकस्य लवनं विना रसः नास्ति तथा काव्यस्य न रसः औचित्यं विना। काव्यं, नाटकं, सर्वत्रं औचित्यस्य प्रयोजनीयता अस्ति।काव्यं, नाटकं च औचित्यं विना पूर्णं न भवति।

**संदर्भ ग्रंथ**

[1] दिवादिगणपठितः १२२३ धातुसंख्या
[2] वैयाकरणसिद्धान्तकैमुदी पाणिनीयसूत्राङ्कः ३/१/१३५
[3] पाणिनीयसूत्राङ्कः – ५/२/३६
[4] अमरकोषः – रामाश्रमीव्याख्या- व्याख्याता भानोजीदीक्षितः – ३-५-३९
[5] कि.प्र. स.३४श्लो - मल्लिनाथघण्टापदव्याख्या
[6] ५-१-१२४ पाणिनीयसूत्राङ्कः
[7] पाणिनीय ४-१-४१
[8] ६-४-१५०
[9] औ.वि.च-७
[10] औ.वि.च.८
[11] औ.वि.च.९
[12] औ.वि.च.१०